# trailokyamohanakAlIkavacham

# ત્રૈલોક્યમોહનકાલીકવચમ્

## Document Information

Text title : trailokyamohanakaaliikavacham

File name : trailokyamohanakaaliikavacham.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale deviishankarasa.nvAde

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 22, 2022

*sanskritdocuments.org*

# ત્રૈલોક્યમોહનકાલીકવચમ્

શ્રીગણેશાય નમઃ ।
શ્રીદેવ્યુવાચ ।
દેવદેવમહાદેવ સંસારપ્રીતિકારકઃ ।
સર્વવિદ્યેશ્વરીં વિદ્યાં કાલિકાં કથયાદ્ભુતામ્ ॥ ૧॥

શ્રીશિવ ઉવાચ ।
શ ૃણુદેવિ મહાવિદ્યાં સર્વવિદ્યોત્તમોત્તમામ્ ।
સર્વેશ્વરીં મહાવિદ્યાં સર્વદેવપ્રપૂજિતામ્ ॥ ૨॥

યસ્યાઃ કટાક્ષમાત્રેણ ત્રૈલોક્યવિજયીહરઃ ।
બભૂવકમલાનાથો વિભુબ્રહ્મા પ્રજાપતિ ॥ ૩॥

શચીસ્વામીદેવનાથો યમોપિધર્મનાયકઃ ।
ત્રૈલોક્યપાવની ગઙ્ગા  કમલા શ્રીર્હરિપ્રિયા ॥ ૪॥

દિનસ્વામિરવિશ્ચન્દ્રો નિશાપતિર્ગ્રહેશ્વરઃ ।
જલાધિપતિર્વરુણઃ કુબેરોપિધનેશ્વરઃ ॥ ૫॥

અવ્યાહતગતિર્વાયુર્ગજાસ્યોવિઘ્નનાયકઃ ।
વાગીશ્વરઃ સુરાચાર્યો ?? ગુરુઃ કવિઃ ॥ ૬॥

એવં હિ સર્વદેવાશ્ચ સર્વસિદ્ધિશ્વરાઃ પ્રિયે ।
તસ્યાસ્તુ કવચં દિવ્યં માતૃજારં વિભાવય ॥ ૭॥

અસ્ય શ્રીદક્ષિણકાલીકવચમન્ત્રસ્ય ભૈરવ ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્મશાનકાલી દેવતા,
ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।
લલાટં પાતુ ચક્રીં મે હરેણારાધિતં સદા ।
નેત્રેમે રક્ષતુ ક્રીં ક્રીં વિષ્ણુના સેવિતા પુરા ॥ ૮॥

ક્રીં હૂઁ હ્રીં નાસિકાં પાતુ બ્રહ્મણા સેવિતા પુરા ।

ક્રીં ક્રીં ક્રીં વદનં પાતુ શક્રેણારાધિતા સદા ॥ ૯॥

ક્રીં સ્વાહા શ્રવણં પાતુ યમેનૈવપ્રપૂજિતા ।
ક્રીં હૂઁ હ્રીં સ્વાહા રસના ગઙ્ગયાસેવિતાવતુ ॥ ૧૦॥

દન્તપઙ્ક્તિ સદા પાતુ ૐ ક્રીં હૂઁ હ્રીં સ્વાહા મમ ।
ભુક્તિમુક્તિ પ્રદા કાલી શ્રિયા નિત્યં સુસેવિતા ॥ ૧૧॥

ઓષ્ટાધરં સદા પાતુ ક્રીં ક્રીં ક્રીં હૂઁ હૂઁ
હ્રીં હ્રીં મમ સર્વસિદ્ધિપ્રદાયિકા ॥ ૧૨॥

કણ્ઠં પાતુ મહાકાલી ૐ ક્રીં હ્રીં મે સ્વાહા
મમ ચન્દ્રેણારાધિતા ચતુર્વર્ગફલપ્રદા ॥ ૧૩॥

હસ્તયુગ્મં સદા પાતુ ક્રીં ક્રીં ક્રીં હૂઁ હૂઁ હ્રીં હ્રીં સ્વાહા
સૌખ્યદા મોક્ષદા કાલી વરુણેનૈવસેવિતા ॥ ૧૪॥

ૐ ક્રીં હૂઁ હ્રીં ફટ્ સ્વાહા હૃદયં પાતુ સર્વદા ।
સર્વસમ્પત્પ્રદા કાલી કુબેરેણોપસેવિતા ॥ ૧૫॥

ઐં હ્રીં ૐ ઐં હૂઁ ફટ્ સ્વાહા હસ્તયુગ્મં સદાવતુ ।
વાયુનોપાસિતાકાલી યશોબલ સુખપ્રદા ॥ ૧૬॥

ક્રીં ક્રીં હૂઁ હૂઁ હ્રીં હ્રીં ફટ્ પાતુ જઠરં મમ ।
સર્વસિદ્ધિપ્રદા કાલી ગણનાથેન સેવિતા ॥ ૧૭॥

ક્રીં દક્ષિણે કાલિકે હ્રીં સ્વાહા નાભિં મમાવતુ ।
સિદ્ધિબુદ્ધિકરી કાલી ગુરુણા સેવિતા પુરા ॥ ૧૮॥

લિઙ્ગં પાતુ સદા હૂઁ હૂઁ દક્ષિણે કાલિકે હ્રીં ।
શુક્રેણરાધિતા કાલી ત્રૈલોક્યજયદાયિની ॥ ૧૯॥

પાત્વણ્ડ કોશં ક્રીં ક્રીં દક્ષિણે કાલિકે હ્રીં હ્રીં સ્વાહા ।
ધરયા સેવિતા વિદ્યા સર્વરત્ન પ્રદાયિની ॥ ૨૦॥

પાતું ગુદં ક્રીં ક્રીં દક્ષિણે કાલિકે હ્રીં સ્વાહા ।
દ્વાદશીયમહાવિદ્યા રાઘવેણાર્ચિતા સદા ॥ ૨૧॥

જાનુની પાતુ ૐ ક્રીં ક્રીં દક્ષિણે કાલિકે સ્વાહા ।
એકાદશી મહાવિદ્યા મેઘનાદેન સેવિતા ॥ ૨૨॥

ક્રીં ક્રીં દક્ષિણે કાલિકે હ્રીં હ્રીં સ્વાહા જઙ્ઘેવતુ
દ્વાદશીચ મહાવિદ્યા પ્રહ્લાદેનચસેવિતા ॥ ૨૩॥

ક્રીં હૂઁ હ્રીં દક્ષિણે કાલિકે ક્રીં હૂઁ હ્રીં તથાઙ્ગુલીઃ
પાતુ મે દ્વાદશીકાલી ક્ષેત્રપાલેન સેવિતા ॥ ૨૪॥

ક્રીં હૂઁ હ્રીં દક્ષિણે કાલિકે ક્રીં હૂઁ હ્રીં સ્વાહા
ચ નખાન્સર્વાત્સદા પાતુ પઞ્ચદશીત્ ગ્રહેશ્વરી ॥ ૨૫॥

ક્રીં ક્રીં ક્રીં હૂઁ હૂઁ હ્રીં હ્રીં દક્ષિણે કાલિકે
ક્રીં ક્રીં ક્રીં મમ પૃષ્ઠે સદા પાતુ ષોડશી પરમેશ્વરી ॥ ૨૬॥

ક્રીં ક્રીં ક્રીં પાતુ રોમાણિ હૂઁ હૂઁ રક્ષતુ વર્મણિ ।
માંસં પાતુ સદા હ્રીં હ્રીં રક્તં દક્ષિણે કાલિકે ॥ ૨૭॥

ક્રીં ક્રીં ક્રીં પાતુ મે અસ્થિમજ્જાં હૂઁ હૂઁ સદાવતુ ।
હ્રીં હ્રીં શુક્રં સદા પાતુ રંધ્રં સ્વાહા મમાવતુ ॥ ૨૮॥

દ્વાવિંશત્યક્ષરી વિદ્યા સર્વલોકેષુ દુર્લભા ।
મહાવિદ્યેશ્વરી વિદ્યા સર્વતન્ત્રેષુ ગોપિતા ॥ ૨૯॥

સૂર્યવંશેન સોમેન રામેણજગ્નિના ।
જયન્તે ન સુમન્તે ન બલિનાનારદેન ચ ॥ ૩૦॥

બિભીષણેનબાણેન ભૃગુણાકશ્યપેન ચ ।
કપિલેન વસિષ્ઠેન ધૌમ્યેન ત્રિપુરેણ ચ ॥ ૩૧॥

માર્કણ્ડયેન ધ્રુવેણૈવદ્રોણેન સત્યભામયા ।
ઋષ્યશૃઙ્ગેન કર્ણેન ભારદ્વાજેન સંયુતા ॥ ૩૨॥

સર્વેણારાધિતા વિદ્યા જરામૃત્યુ વિનાશિની ।
પૂર્ણવિદ્યા મહાકાલી વિદ્યારાજ્ઞી પ્રકીર્તિતા ॥ ૩૩॥

કાલી કપાલિની કુલ્લા કુરુકુલ્લા વિરોધિની ।
વિપ્રચિત્તા તથોગ્રપ્રભા દીપ્તા ઘનત્વિષા ॥ ૩૪॥

નીલા ઘના બલાકા ચ માત્રા મુદ્રામિતાપિ ચ ।
એતાઃ સર્વા ખડ્ગધરા મુણ્ડમાલા વિભૂષણા ॥ ૩૫॥

હૂઁ હૂઁકારેટ્ટહાસેન સર્વત્ર પાતુ માં સદા ।
બ્રહ્માણી પાતુ માં પૂર્વે આગ્નેયા વૈષ્ણવી તથા ॥ ૩૬॥

માહેશ્વરી પાતુ યામ્યે ચામુણ્ડા નૈરૃતે સદા ।
કૌમારી વારુણે પાતુ વાયવ્યે અપરાજિતા ॥ ૩૭॥

વારાહીચોત્તરે પાતુ ઈશાન્યાં નારસિંહિકા ।
અધ ઊર્ધ્વે પાતુ કાલી પાર્શ્વેપૃષ્ઠે ચ કાલિકા ॥ ૩૮॥

જલેસ્થલે ચ પાતાલે શયને ભોજનેગૃહે
રાજસ્થાને કાનને ચ વિવાદે મરણે રણે ॥ ૩૯॥

પર્વતે પ્રાન્તરે શૂન્યે પાતુ માં કાલિકા સદા ।
શવાસને શ્મશાને વા શૂન્યાગારે ચતુષ્પથે ॥ ૪૦॥

યત્ર યત્ર ભય પ્રાપ્તિઃ સર્વત્ર પાતુ કાલિકા ।
નક્ષત્ર તિથિ વારેષુ યોગં કરણયોરપિ ॥ ૪૧॥

માસે પક્ષે વત્સરે ચ દણ્ડેયામેનિમેષકે ।
દિવારાત્રૌ સદા પાતુ સન્ધ્યયોઃ પાતુ કાલિકા ॥ ૪૨॥

સર્વત્ર કાલિકા પાતુ કાલિકા પાતુ સર્વદા ।
સકૃધઃ શ◌ૃણુયાનિત્યં કવચં શિવ નિર્મિતમ્ ॥ ૪૩॥

સર્વપાપં પરિત્યજ્ય ગચ્છેછિવસ્યચાલયમ્ ।
ત્રૈલોક્યમોહનં દિવ્યં દેવતાનાં સુદુર્લભમ્ ॥ ૪૪॥

યઃ પઠેત્સાધકાધીશઃ સર્વકર્મ જપાન્વિતઃ ।
સર્વધર્મેદ્ભવદ્ધર્મી સર્વવિદ્યેશ્વરેશ્વરઃ ॥ ૪૫॥

કુબેર ઇવ વિત્તાઢ્યઃ સુવાણી કોકિલસ્વરઃ ।
કવિત્વે વ્યાસ સદૃશો ગણેશવચ્છતીધરઃ ॥ ૪૬॥

કામદેવ સમોરૂપે  વાયુતુલ્યઃ પરાક્રમે ।
મહેશ ઇવ યોગીન્દ્ર ઐશ્વર્યે સુરનાયકઃ ॥ ૪૭॥

બૃહસ્પતિસમોધીમાં જરામૃત્યુવિવર્જિતઃ ।
સર્વજ્ઞઃ સર્વદર્શી ચ નિઃપાપઃ સકલપ્રિયઃ ॥ ૪૮॥

અવ્યાહતગતિઃ શાન્તો ભાર્યાપુત્ર સમન્વિતઃ ।
યો દેહે કુરુતે નિત્યં કવચં દેવદુર્લભમ્ ॥ ૪૯॥

ન શોકોનભય ક્લેશો ન રોગોન પરાજયઃ ।

ધનહાનિર્વિષાદોય પરિવારોભવેન્નહિ ॥ ૫૦॥

સઙ્ગ્રામેષુ જયેચ્છત્રૂન્યથાવહ્નિર્દહેદ્ધનમ્ ।
બ્રહ્માસ્ત્રાદિનિવાસ્ત્રાણિ પશવઃ કણ્ટકાદમઃ ॥ ૫૧॥

તસ્યદેહં ન ભિન્દતિ વજ્રાધિક ભવેદ્વપુઃ ।
ગ્રહભૂતપિશાશ્ચ યક્ષ રાક્ષસ કિન્નરાઃ ॥ ૫૨॥

સર્વે દૂરાત્પલાયન્તે હિંસકો નશ્યતિ ધ્રુવમ્ ।
તદ્દેહં ન દહેદગ્નિ ન તાપયતિભાસ્કરઃ ॥ ૫૩॥

ન શોષયતિ વાતોઽપિ ન ક્લેદં કુરુતેપયઃ ।
પુત્રવત્પાલ્યતે કાલ્યા ન હિમં કુરુ તે શશી ॥ ૫૪॥

જલસૂર્યેન્દુવાતાનાં સ્તમ્ભકેનાત્ર સંશયઃ ।
બહુ કિં કથયિષ્યામિ સર્વસિદ્ધિમુપા લભેત્ ॥ ૫૫॥

રાજ્યં ભોગં સુખં લબ્ધ્વા સ્વેચ્છયાપિ શિવો ભવેત્ ।
મોહન સ્તમ્ભનાકર્ષમારણોચ્ચાટનં ભવેત્ ॥ ૫૬॥

કાકવન્ધ્યા ચ યાનારી વન્ધ્યા વા મૃતપુત્રિકા ।
કણ્ઠે વા દક્ષિણે બાહૌ લિખિત્વા ધારયેદ્યદિ ॥ ૫૭॥

તદાપુત્રો ભવેત્સત્યં ચિરાયુઃ પણ્ડિતઃ શુચિઃ ।
સ્વામિનો વલ્લભાસાપિ ધનધાન્ય સુતાન્વિતા ॥ ૫૮॥

ઇદં કવચમજ્ઞાત્વા યો જપેત્કાલિકામનુમ્ ।
ધ્યાનેનકોટિજપ્તેન તસ્ય વિદ્યા ન સિદ્ધ્યતિ ॥ ૫૯॥

પદે પદે ભવેદ્દુખં લોકાનાનિન્દતો ધ્રુવમ્ ।
ઇહલોકે ભવેદ્દુઃખી પરે ચ નરકં વ્રજેત્ ॥ ૬૦॥

ગુરું મનું સમં જ્ઞાત્વા યઃ પઠેત્કવચોત્તમમ્ ।
તસ્ય વિદ્યા ભવેત્સિદ્ધા સત્યં સત્યં વરાનને ॥ ૬૧॥

ય ઇદં કવચં દિવ્યં પ્રકાશ્ય શિવહાભવેત્ ।
ભક્તાય શ્રેષ્ઠપુત્રાય સાધકાય ય પ્રકાશયેત્ ॥ ૬૨॥

॥ ઇતિ શ્રીરુદ્રયામલે દેવીશઙ્કર સંવાદે
ત્રૈલોક્યમોહનં નામ કવચં અથવા દક્ષિણાકાલિકાકવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*trailokyamohanakAlIkavacham*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*